श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीरङ्गनाथ पादुकासहस्र

# ॥ अग्रमणिमाला स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीरङ्गनाथ पादुकासहस्र

# ॥ अग्रमणिमाला स्तोत्रम् ॥

## श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
## वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

*The* ***vedās*** *prostrate before the Lord's sacred feet and eulogize them. Swamy Nammaazvaar is seen as the* ***pādukais*** *of the Lord by the* ***vedās*** *during their time of adoration of the Lord's holy feet. The* ***vedams*** *hear the echo of* ***śrī pādukāsahasram*** *there under the* ***praṇavākṛti vimānam*** *of Lord* ***śrī raṅganātha****. The* ***vedās*** *recognize that* ***śrī pādukāsahasram*** *was composed by* ***trayyanta guru svāmi nigamānta deśikan*** *and get enraptured in listening to the 32* ***slokams****, which form the beginning of each of the 32* ***paddhatis****.* ***ācāryās*** *reveal that the recitation of this* ***mālā*** (garland)/performance of ***japam*** *of these 32* ***slokams****, as a complete* ***stotram****, will be blessed with all auspiciousness —–* ***śrīmān varadācāri saḍagopan*****.

सन्तः श्रीरङ्गपृथ्वीशचरणत्राणशेखराः।
जयन्ति भुवनत्राणपदपङ्कजरेणवः॥ १ ॥

वन्दे विष्णुपदासक्तं तमृषिं ताञ्च पादुकाम्।
यथार्था शठजित्संज्ञा मच्चित्तविजयाद्ययोः॥ २ ॥

वन्दे तद्रङ्गनाथस्य मान्यं पादुकयोर्युगम्।
उन्नतानामवनतिः नतानां यत्र चोन्नतिः॥ ३ ॥

भजामः पादुके ! याभ्यां भरतस्याग्रजस्तदा।
प्रायः प्रतिप्रयाणाय प्रास्थानिकमकल्पयत्॥ ४ ॥

प्रशस्ते रामपादाभ्यां पादुके पर्युपास्महे।
आनृशंस्यं ययोरासीदाश्रितेष्वनवग्रहम्॥ ५ ॥

*For detailed meaning of this stotram, please visit www.sadagopan.org

अधीष्टे पादुका सा मे यस्याः साकेतवासिभिः।
अन्वयव्यतिरेकाभ्यामन्वमीयत वैभवम्॥ ६ ॥

पाहि नः पादुके ! यस्याः विधास्यन् अभिषेचनम्।
आभिषेचनिकं भाण्डं चक्रे रामः प्रदक्षिणम्॥ ७ ॥

अभिषेकोत्सवात् तस्मात् यस्या निर्यातनोत्सवः।
अत्यरिच्यत तां वन्दे भव्यां भरतदेवताम्॥ ८ ॥

नमस्ते पादुके ! पुंसां संसारार्णवसेतवे।
यदारोहस्य वेदान्ता वन्दिवैतालिकाः स्वयम्॥ ९ ॥

शौरेः शृङ्गारचेष्टानां प्रसूतिं पादुकां भजे।
यामेष भुङ्क्ते शुद्धान्तात् पूर्वं पश्चादपि प्रभुः॥ १० ॥

अग्रतस्ते गमिष्यामि मृद्नन्ती कुशकण्टकान्।
इति सीताऽपि यद्वृत्तिमियेष प्रणमामि ताम्॥ ११ ॥

शौरेः सञ्चारकालेषु पुष्पवृष्टिर्दिवश्च्युता।
पर्यवस्यति यत्रैव प्रपद्ये तां पदावनीम्॥ १२ ॥

पान्तु वः पद्मनाभस्य पादुकाकेळिपांसवः।
अहल्यादेहनिर्माणपर्यायपरमाणवः॥ १३ ॥

श्रुतीनां भूषणानां ते शङ्के रङ्गेन्द्रपादुके !।
मिथः सङ्घर्षसञ्जातं रजः किमपि शिञ्जितम्॥ १४ ॥

उदर्चिषस्ते रङ्गेन्द्रपादावनि ! बहिर्मणीन्।
अन्तर्मणिरवं श्रुत्वा मन्ये रोमाञ्चिताकृतीन्॥ १५ ॥

मुखबाहूरुपादेभ्यो वर्णान् सृष्टवतः प्रभोः।
प्रपद्ये पादुकां रत्नैर्व्यक्तवर्णव्यवस्थितिम्॥ १६ ॥

प्रपद्ये रङ्गनाथस्य पादुकां पद्मरागिणीम्।
पदैकनियतां तस्य पद्मवासामिवापराम्॥ १७ ॥

बद्धानां यत्र नित्यानां मुक्तानामीश्वरस्य च।
प्रत्यक्षं शेषशेषित्वं सा मे सिद्ध्यतु पादुका॥ १८ ॥

वन्दे गारुत्मतीं वृत्त्या मणिस्तोमैश्च पादुकाम्।
यया नित्यं तुळस्येव हरितत्त्वं प्रकाश्यते॥ १९ ॥

हरिणा हरिनीलैश्च प्रतियत्नवतीं सदा।
अयत्नलभ्यनिर्वाणामाश्रये मणिपादुकाम्॥ २० ॥

शौरेः शुद्धान्तनारीणां विहारमणिदर्पणम्।
प्रसक्तेरिव संस्थानं पदत्राणमुपास्महे॥ २१ ॥

कल्याणप्रकृतिं वन्दे भजन्तीं काञ्चनश्रियम्।
पदार्हां पादुकां शौरेः पद एव निवेशिताम्॥ २२ ॥

सृष्टां भूमावनन्तेन नित्यं शेषसमाधिना।
अहं सम्भावयामि त्वामात्मानमिव पादुके !॥ २३ ॥

प्रपद्ये पादुकारूपं प्रणवस्य कलाद्वयम्।
ओतं मितमिदं यस्मिन्ननन्तस्यापि तत्पदम्॥ २४ ॥

अणोरणीयसीं विष्णोर्महतोऽपि महीयसीम्।
प्रपद्ये पादुकां नित्यं तत्पदेनैव सम्मिताम्॥ २५ ॥

उदग्रयन्त्रिकां वन्दे पादुकां यन्निवेशनात्।
उपर्यपि पदं विष्णोः प्रत्यादिष्टप्रसाधनम्॥ २६ ॥

सूचयन्तीं स्वरेखाभिरनालेख्यसरस्वतीम्।
अलेखनीयसौन्दर्यामाश्रये शौरिपादुकाम्॥ २७ ॥

कलासु काष्ठामातिष्ठन् भूम्ने सम्बन्धिनामपि।
पादुका रङ्गधुर्यस्य भरताराध्यतां गता॥ २८ ॥

विधौ प्रवृत्ते यद्द्रव्यं गुणसंस्कारनामभिः।
श्रेयः साधनमाम्नातं तत्पदत्रं तथाऽस्तु मे॥ २९ ॥

प्रतिष्ठां सर्वचित्राणां प्रपद्ये मणिपादुकाम्।
विचित्रजगदाधारो विष्णुर्यत्र प्रतिष्ठितः॥ ३० ॥

प्रपद्ये पादुकां देवीं परविद्यामिव स्वयम्।
यामर्पयति दीनानां दयमानो जगद्गुरुः॥ ३१ ॥

उपाख्यातां तथात्वेन वसिष्ठाद्यैर्महर्षिभिः।
उपायफलयोः काष्ठामुपासे रामपादुकाम्॥ ३२ ॥

॥ इति श्रीरङ्गनाथ पादुकासहस्र अग्रमणिमाला स्तोत्रम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥